# संस्कृतवार्ताः

दिनाङ्क :- 30.08.2025

प्रात: - 06:55

भारत-जापान शिखर सम्मेलनम्-पीएम टोकियो

प्रधानमन्त्री नरेन्द्रमोदी टोक्यो-नगरे जापान-देशस्य समकक्षीयेण शिगेरु इशिबा इत्यनेन सह पञ्चदशे भारत-जापान वार्षिकसम्मेलने भागम् अगृह्णात्। शिखरसम्मेलने नेतृभ्यां द्विपाक्षिकसम्बन्धानां सम्पूर्णा समीक्षा कृता। नेतारौ विशेष-सामरिक-वैश्विक-सहभागित्वस्य अग्रिमचरणस्य प्रगतिविषये च चर्चां कृतवन्तौ। संयुक्त-पत्रकारसम्मेलनं सम्बोधयन् प्रधानमन्त्री मोदी अवदत् यत् तेषां चर्चा फलदायिका उद्देश्यपूर्णा च आसीदिति। सः अवदत् यत् विश्वशान्त्यै स्थिरतायै च भारत-जपान्-सहभागित्वम् आवश्यकमस्ति। अग्रिमदशकाय मार्गचित्रं निर्मितम् अस्ति इति श्रीमोदी सूचितवान्।

जापान्-देशस्य प्रधानमन्त्री स्वकीये वक्तव्ये अवदत् यत् भारतं नवान्वेषण-माध्यमेन सम्पूर्णे विश्वे परिवर्तनं आनयति। सः अवदत् यत् परस्परपूरकः पारस्परिकश्च सम्बन्धः भारत-जापान्-देशाभ्यां लाभप्रदः अस्तीति।

उत्तराखण्ड्-मेघस्फोटः

उत्तराखण्ड्-राज्यस्य रुद्रप्रयाग-चमोली-मण्डलयोः मेघस्फोटैः महती क्षतिः अभवत्। प्रभावितेषु क्षेत्रेषु युद्धस्तरेण साहाय्योद्धारकार्याणि प्रचलन्ति। अस्माकं देहरादून-संवाददात्रा उक्तं यत्, चमोली-मण्डलस्य देवाल्-खण्डे एकस्मिन् गृहे क्षतिः अभवत्, यस्य परिणामेन द्वौ जनौ मृतौ। रुद्रप्रयागस्य मण्डल-दंडाधिकारी प्रतीक जैनः अवदत् यत् भग्नावशेषस्य अधः केचन जनाः अवरुद्धाः भवितुं शक्नुवन्तीति सम्भावनास्ति।

हिमाचल-ऋतुः

हिमाचलप्रदेशे वृष्टिकालिक-क्रियाकलापैः सामान्यजनजीवने गभीरः प्रभावः जातोऽस्ति। प्रचण्डवृष्ट्या भूस्खलनेन च, द्वाभ्यां राष्ट्रियराजमार्गाभ्यां सह अन्येषु च षड्शताधिकमार्गेषु अवरोधः अस्ति।

कर्नाटक/शिवराजसिंह:

कृषि अथ कृषककल्याण मन्त्री श्रीशिवराजसिंहः चौहानः अवदत् यत् अधुना भारतदेशः अन्नोत्पादने आत्मनिर्भरः अस्ति। देशः केवलं स्वजनसंख्यायाः पोषणाय पर्याप्तं धान्यमेव उत्पादयति इति न, अपि तु अन्येषां राष्ट्राणामपि साहाय्यं कर्तुं समर्थः अस्ति। श्री चौहान: गतदिने मैसूरुनगरे सम्पन्ने जगद्गुरोः डॉ॰ श्रीशिवरात्रिराजेन्द्रमहास्वामिनः दशाधिकशततमे-जयंती-महोत्सवे भाषमाणः आसीत्।

भारतीय ऋतु विज्ञान

भारतीय-ऋतु-विज्ञान-विभागस्य सूचनानुसारम् अद्य मध्यमहाराष्ट्रे, मराठवाडे, गुजरातप्रदेशे, केरलदेशे, तटीयकर्णाटके, कोङ्कणगोवायां च अतिवृष्टिः भविष्यति। सममेव विभागेन आगामिपञ्चदिनेषु उत्तरपश्चिमभारते अपि अतिवृष्टेः सम्भावना प्रकटिता।

बैड्मिण्टन

पेरिस्-नगरस्थे विश्वच्याम्पियन्शिप्-बैड्मिण्टनप्रतियोगितायां भारतस्य सात्विक साइराज रङ्किरेड्डी चिरागशेट्टी च उपान्त्यचक्रे प्रविष्टवन्तौ। अनेनैव भारताय एकं पदकं सुनिश्चितं भवति।

सी.डब्ल्यू.जी.

भारतेन त्रिंशदधिक द्विसहस्र तमवर्षस्य राष्ट्रमण्डलक्रीडाया: आयोजकपदं स्वीकर्तुं प्रस्तावः औपचारिकरूपेण समर्पितः। एषः औपचारिकप्रस्तावः गतदिने लण्डन्-नगरे भारतीयराष्ट्रमण्डलक्रीडासंघस्य गुजरातसर्वकारस्य च प्रतिनिधिसमित्या राष्ट्रमण्डलक्रीडासंघटनस्य अध्यक्षाय डॉ॰ डोनाल्ड् रुकारे इत्यस्मै समर्पितः।

संस्कृत-साप्ताहिकी

प्रिया: श्रोतार:, संस्कृतजगता सम्बद्धै: विभिन्नै: क्रियाकलापै: संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्या: एफ.एम.गोल्ड-प्रवाहिकात: श्व: रविवासरे मध्याह्ने सार्धैक-वादनत: भविष्यति। कृपया श्रृण्वन्तु।